.. suvachanAni ..

॥ सुवचनानि ॥

अतिपरिचयादवज्ञा ।
अतिलोभो विनाशाय ।
अतितृष्णा न कर्तव्या ।
अति सर्वत्र वर्जयेत् ।
अधिकस्याधिकं फलम् ।
अनतिक्रमणीया हि नियतिः ।
अल्पश्च कालो बहवश्च विघ्नाः ।
अलभ्यो लाभः ।
अव्यापारेषु व्यापारः ।
अहिंसा परमो धर्मः ।
अभद्रं भद्रं वा विधिलिखितमुन्मूलयति कः ।
अर्थो हि लोके पुरुषस्य बन्धुः ।
आकृतिर्बकस्य दृष्टिस्तु काकस्य ।
आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ।
इक्षुः मधुरोऽपि समूलं न भक्ष्यः ।
इतः कूपः ततस्तटी ।
इतो भ्रष्टस्ततो भ्रष्टः ।
ईश्वरेच्छा बलीयसी ।
उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः ।
उत्सवप्रियाः खलु मनुष्याः ।
कण्टकेनैव कण्टकमुद्धरेत् ।
कर्तव्यो महदाश्रयः ।
कवयः किं न पश्यन्ति ?
काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
कालाय तस्मै नमः ।
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।
किमिव हि दुष्करमकरुणानाम् ।
किं मिष्टमन्नं खरसूकराणाम् ?
क्षमया किं न सिद्ध्यति ।
क्लेशः फलेन हि पुनर्नवतां विधत्ते ।
गतं न शोच्यम् ।
गतानुगतिको लोकः न कश्चित् पारमार्थिकः ।

गहना कर्मणो गतिः ।
गुणाः सर्वत्र पूज्यन्ते ।
चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।
जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
जीवो जीवस्य जीवनम् ।
त्रुटितः सम्बन्धः प्रशान्तः कलहः ।
त्रैलोक्ये दीपकः धर्मः ।
दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम् ।
दूरतः पर्वताः रम्याः ।
द्रव्येण सर्वे वशाः ।
धर्मो मित्रं मृतस्य ।
धीराः हि तरन्ति आपदम् ।
नास्ति सत्यसमो धर्मः ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ।
न भूतो न भविष्यति ॥
नमः शिवाय ।
नमो भगवते वासुदेवाय ।
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
न शान्तेः परमं सुखम् ।
निगूढेऽपि कुङ्कुटे उदेत्येव अरुणः ।
निर्वाणदीपे किमु तैलदानम् ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।
निःस्पृहस्य तृणं जगत् ।
न निश्चितार्थात् विरमन्ति धीराः ।
निर्धनस्य कुतः सुखम् ।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।
परदुःखं शीतलम् ।
परोपकाराथमिदं शरीरम् ।
परोपदेशे पाण्डित्यम् ।
परोपकारः पुण्याय ।
परोपकाराय सतां विभूतयः ।
पुनः पुनरपि प्रक्षाल्य कज्जलं न श्वेतायते ।
पिण्डे पिण्डे मतिर्भिन्ना ।
प्रज्ज्वालितो ज्ञानमयः प्रदीपः ।
प्रथमग्रासे मक्षिकापातः ।

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
बधिरात् मन्दकर्णः श्रेयान् ।
बहुजनहिताय बहुजनसुखाय ।
बहुरत्न वसुन्धरा ।
बालानां रोदनं बलम् ।
बुद्धिः कर्मानुसारिणी ।
बुद्धिर्यस्य बलं तस्य ।
भद्रं कर्णेभिः श्रुणुयाम देवाः ।
भवन्ति भवितव्यानां द्वाराणि सर्वत्र ।
भिन्नरुचिर्हि लोकः ।
मधु तिष्ठति जिव्हाग्रे हृदये तु हलाहलम् ।
मनः पूतं समाचरेत् ।
मनोरथानामगतिर्न विद्यते ।
मरणं प्रकृतिः शरीरिणाम् ।
महाजनो येन गतः स पन्थाः ।
मार्गारब्धाः सर्वयत्नाः फलन्ति ।
मातृदेवो भव ।
पितृदेवो भव ।
आचार्यदेवो भव ।
अतिथिदेवो भव ।
मूढः परप्रत्ययनेयबुद्धिः ।
मृदुर्हि परिभूयते ।
मौनं सर्वार्थसाधनम् ।
यथा बीजं तथा अङ्कुरः ।
यथा राजा तथा प्रजा ।
यद् वा तद् वा भविष्यति ।
यद् वा तद् वा वदति ।
याचको याचकं दृष्ट्वा श्वानवत् गुर्गुरायते ।
यादृशं वपते बीजं तादृशं लभते फलम् ।
यः क्रियावान् स पण्डितः ।
युद्धस्य कथा रम्या ।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत् ।
योजकस्तत्र दुर्लभः ।
राजा कालस्य कारणम् ।
वन्दे मातरम् ।
वक्ता दशसहस्रेषु ।

वचने का दरिद्रता ?
विद्वान् सर्वत्र पूज्यते ।
विद्याधनं सर्वधनप्रधानम् ।
विनाशकाले विपरितबुद्धिः ।
शठं प्रति शाठ्यम् ।
शरीरमाद्यं खलु धर्मसाधनम् ।
शीलं परं भूषणम् ।
शुभास्ते पन्थानः ।
शुभं भवतु ।
सत्यमेव जयते न अनृतम् ।
सत्यं कण्ठस्य भूषणम् ।
सुखमुपदिश्यते परस्य ।
संहतिः कार्यसाधिका ।
स्वभावो दुरतिक्रमः ।

Please send corrections to sanskrit@cheerful.com
Last updated December 21, 2014
http://sanskritdocuments.org